त्वविकल्पः॥ ७ ॥ तद्यथापि नाम सत्त्वको वा राज्ञश्चक्रवर्तिनश्चतुरंगबलकायश्चक्ररत्नमयदमार्गं गच्छति। किं बहुना यत्र राज्ञश्चक्रवर्तिनश्चक्ररत्नं तिष्ठति तत्र राजा चक्रवर्ती सबलकायः समर्पयति न च
चक्ररत्नं स्थानमभ्यस्तमिति। एवमेव पञ्च पारमिता प्रज्ञापारमितानुगाः प्रज्ञापारमिताप्रतिष्ठायिका यानं सर्वाकारज्ञतागमनानुगच्छन्ति। प्रज्ञापारमिता तु तिष्ठति तत्र पारमिता नातिक्रामन्ति॥ चक्रिरत्नचक्रनामरत्नः
विकल्पः॥ • ॥ तद्यथापि नाम सत्त्वको वा राज्ञश्चक्रवर्तिनं समयविषयकं वर्त्तमानं पृथिव्यां चक्रवर्तिचतुरंगबलकायः स्थानस्थो मार्गस्थः एवमेव पञ्च पारमिताः प्रज्ञापारमिताया मार्गस्थाय
मार्गस्थायं सर्वाकारज्ञतागमनं तिष्ठति न दानपारमिताया एवं भवति दानपारमिता ममानुगच्छतु शीलपारमिता ममानुगच्छतु क्षान्तिपारमिता ममानुगच्छतु वीर्यपारमिता ममानुगच्छतु ध्यानपार-
मिता ममानुगच्छत्वेवं दानपारमिताया एवं न भवति प्रज्ञापारमिता मनुगच्छतु यमिति न शीलपारमिताया न क्षान्तिपारमिताया न वीर्यपारमिताया न ध्यानपारमिताया एवं भवति प्रज्ञापारमि-
ता मनुगच्छतु यमिति। तत्कस्य हेतोः स्वभावरहिताः सर्वे ते किंचिन्न समर्थाः॥ स्वभावशून्यतानुगतमपि विसमर्थः॥ ७ ॥ पृथग्जनानां तेषां रूपगवेषणमकरणं यदा रूपगवेषणं धर्मा स्वभावरहिता गन्तव्याः सर्वे
र्थं वा विसंयोगमहाप्रत्युपस्थाना दानपारमितायां शीलपारमितायां क्षान्तिपारमितायां वीर्यपारमितायां ध्यानपारमितायां प्रज्ञापारमितायां वर्तन्ते नष्टान्सम्यक् संबोधिमभिसंबध्यन्ते॥ रूपगवाः

र्नपरिपूरिता न सा काचिच्छीलपारमिता न सा काचित्क्षान्तिपारमिता न सा काचिद्वीर्यपारमिता न सा काचिद्ध्यानपारमिता या बोधिसत्वेन महासत्वेन न परिपूरिता न सा काचित्प्रज्ञापारमिता या बोधि
सत्वेन महासत्वेन न परिपूरिता यस्त्वनेनोपायकौशल्येन समन्वागताः॥ सुभूतिराह॥ आश्चर्यं यावद्भगवन् बोधिसत्वानां महासत्वानां यत्नेनोपायकौशल्येन समन्वागताः॥ भगवानाह॥ एवमेतत्सुभूते एवमेत
त्॥ आश्चर्यमेतत्सुभूते बोधिसत्वानां महासत्वानां यत्नेनोपायकौशल्येन समन्वागताः॥ तद्यथापि नाम सूर्याचन्द्रमसोर्मण्डले चतुर्षु द्वीपेषु कार्यं कुर्वाणौ गच्छतश्चाद्वीपानानुगच्छतः॥ एवमेव सुभूते प्रज्ञापा
रमिता पंचसु पारमितासु कर्म करोति पंच पारमिताः स्तृतगच्छन्ति प्रज्ञापारमिताविरहितत्वात्तं पारमिताः ५ पारमितानामधेयं न लभन्ते प्रज्ञापारमिताविरहितत्वात्पारमितानामधेयं
लभन्ते॥ तद्यथापि नाम सुभूते यथा राजा चक्रवर्ती विरहितः ५ सप्तरत्नैर्न राजा चक्रवर्तीति नामधेयं लभते॥ एवमेव सुभूते पंच पारमिता विरहिता प्रज्ञापारमितया न पारमितानामधे
यं लभन्ते॥ शक्तिच्छन्नाधिगमविकल्पः॥ ७ ॥ तद्यथापि नाम सुभूते स्त्री अपुरुषा या स्त्री सा धर्षणीया भवति धूर्तकानाम्॥ एवमेव सुभूते पंच पारमिताः प्रज्ञापारमिताविरहितत्वात्सुधर्षणीया भवन्ति मार
ण पापीयसा मारकायिकाभि र्वा देवताभिः॥ शक्तिसंपत्तिग्रहणाविकल्पः॥ ७ ॥ तद्यथापि नाम सुभूते संग्रामे शूरो वा पुरुषः सन्नाहसन्नद्धः संग्रामे वर्तमानो दुर्धर्षो भवति [illegible]
र्वा प्रत्यर्थिकैर्वा प्रत्यमित्रैर्वा॥ एवमेव सुभूते पंच पारमिताः प्रज्ञापारमिताऽविरहितत्वाद्दुर्धर्षा भवन्ति मारेण वा पापीयसा मारकायिकाभिर्वा देवताभिरधिमानिकैर्वा पुद्गलैर्वा यावद्बोधिसत्वचण्डाः
लैर्वा पंच पारमिता इह दुर्धर्षा भवन्ति॥ शक्तिविप्रतिपत्तिविकल्पाविकल्पः॥ ७ ॥ तद्यथापि नाम सुभूते कोट्टराजानो राज्ञश्चक्रवर्तिनोऽनुविधेया भवन्ति। सायंगाकवपस्थानायोपगच्छन्ति॥ एवमेव सुभूतेः
पंच पारमिताः प्रज्ञापारमितापरिगृहीताः कायेन सर्वाकारज्ञताकनानुगच्छन्ति॥ शक्तिपरिग्रहसमाप्तिविकल्पः॥ ७ ॥ तद्यथापि नाम सुभूते याः काश्चित्कुनद्यः सर्वास्ता गंगामहानदीगताः

ख्यायते ॥ भगवानाह ॥ एवमेतत्सुभूते एवमेतत् । न सुभूते पारमितानां किंचिन्नानात्वं । यदि पुनः प्रज्ञापारमितानलायागतमाः पञ्च पारमिता नामधेयं लभन्ते । प्रज्ञापारमितां पुनः सुभूते आगम्य
माः पंच पारमिताः पारमितानामधेयं लभन्ते ॥ तद्यथापि नाम सुभूते नानाप्रकारा जन्तमलवाः सुमेरुं पर्वतराजमुपसंक्रान्ता एकवर्णा भवन्ति यदुत कनकवर्णाः ॥ एवमेव सुभूते प्रज्ञापारमितामागम्य पंच
पारमिताः पारमितानामधेयं लभन्ते । ताः सर्वाकारज्ञतामनुप्रविष्टा एकवर्णा भवन्ति न विशेषः कश्चित्प्रज्ञायते ॥ इयं दानपारमिता इयं शीलपारमिता इयं क्षान्तिपारमिता इयं वीर्यपारमिता
इयं ध्यानपारमिता इयं प्रज्ञापारमिता न तत्कस्य हेतोः तथा ह्यासां सर्वासां वा नानात्वेन न कायः अनन्तरत्वाद्वा न प्रज्ञायते ॥ सुभूतिराह । यदि भगवन्नर्थानुपूर्विपञ्चन कस्यचिद्धर्मस्य विशेषो वा नानाकरणं वा
न प्रज्ञायते ॥ कथमियं प्रज्ञापारमिता आसां पञ्चानां पारमितानामग्राख्यायते ज्येष्ठाख्या,यते श्रेष्ठाख्यायते वराख्यायते प्रवराख्यायते प्रणीताख्यायते उत्तमाख्यायते अनुत्तमाख्यायते निरुत्तमाख्याय
ते असमसमाख्यायते ॥ भगवानाह ॥ एवमेतत्सुभूते एवमेतत् । अथानुपूर्विपञ्चन कस्यचिद्धर्मस्य विशेषो वा नानाकरणं वा न प्रज्ञायते ॥ अपि तु खलु पुनर्लौकिकया व्यवहारसंकेतमुपादाय दानपार
मिता प्रज्ञप्यते शीलपारमिता प्रज्ञप्यते क्षान्तिपारमिता प्रज्ञप्यते वीर्यपारमिता प्रज्ञप्यते ध्यानपारमिता प्रज्ञप्यते सत्त्वानां संसारात्परिमोचनाय । न च सत्त्वा जायन्ते न म्रियन्ते न च्यवन्ते नो
पपद्यन्ते सत्त्वासत्त्वात्सर्वधर्मासत्त्वाविविक्ततया । अनेन सुभूते कारणेन आसां पञ्चानां पारमितानां प्रज्ञापारमिता अग्राख्यायते ज्येष्ठाख्यायते श्रेष्ठाख्यायते वराख्यायते प्रवराख्यायते
प्रणीताख्यायते उत्तमाख्यायते अनुत्तमाख्यायते निरुत्तमाख्यायते असमाख्यायते असमसमा ख्यायते ॥ तद्यथापि नाम सुभूते याः काश्चन स्त्रियस्तासां स्त्रीरत्नमग्रमाख्यायते
ज्येष्ठमाख्या,ते श्रेष्ठमाख्यायते वरमाख्यायते प्रवरमाख्यायते प्रणीतमाख्यायते उत्तममाख्यायते अनुत्तममाख्यायते निरुत्तममाख्यायते असममाख्यायते असमसममाख्यायते ॥ एवमेः

य

नादा॥ इदं सुभूते बोधिसत्वस्य महासत्वस्य षड्गुणपारमितास्ववतरज्ञ वं रक्षति विपर्यासेभ्यः विलोयं लोकसन्निवेशः शासनगच्छल्यायकोगरत्यनसंसारतः यति माकृं एषां सत्वानामर्थाय दानपारमि
तायां चरिष्यामि शीलपारमितायां क्षान्तिपारमितायां वीर्यपारमितायां ध्यानपारमितायां प्रज्ञापारमितायां चरिष्यामीति। एषां सत्वानामर्थायाध्यात्मबहिर्धावस्तु परित्यजति तस्य च परि
त्यजतः एवं भवति न किंचित्परित्यक्तं गच्छत्स्वदयास्तथाक्षतद्वस्तुस्वलक्षणशून्यं। एवं खलु सुभूते बोधिसत्वो महासत्व उपपरीक्षमाणो दानपारमितां परिपूरयति। एषामेव सत्वानामर्थाय शी
लं रक्षति कामत्रदयादिगत्कस्यदत्तादानं न कस्यमथ्यामिति न पंसत्याद्यादमनरूवांसस्यक्षं बोधिमभिसंवादश्च संस्थितः प्रज्ञानियानकृत्यामवमदत्तादानं काममिथ्याचारं मृषावादं पिशुनवचनं परुषव
चनं संभिन्नप्रलापमभिध्यां व्यापादं मिथ्यादृष्टिं कुर्यां। श्रावकभूमिं वा प्रत्येकबुद्धभूमिं वा प्रार्थयं। एवं खलु सुभूते बोधिसत्वो महासत्व उपपरीक्षमाणः शीलपारमितायां चरति एषामेव सत्वाना
मर्थाय न कस्यचिद्व्यापादमपि नोत्पादयति। एवं खलु सुभूते बोधिसत्वो महासत्व उपपरीक्षमाणः क्षान्तिपारमितायां चरति। एषामेव सत्वानामर्थाय कायिकं वीर्यमुत्पादयति यावदनुत्तरां सम्य
क्संबोधिमभिसंबुद्धः एवं खलु सुभूते बोधिसत्वो महासत्व उपपरीक्षमाणो वीर्यपारमितायां चरति। एषामेव सत्वानामर्थाय विक्षिप्तचित्तो न भवति यावदनुत्तरां सम्यक्संबोधिमभि
संबुद्धः एवं खलु सुभूते बोधिसत्वो महासत्व उपपरीक्षमाणो ध्यानपारमितायां चरति। एषामेव सत्वानामर्थाय न जातु प्रज्ञापारमिताविरहितो भवति यावदनुत्तरां सम्यक्संबोधिमभि
संबुद्ध इति। कस्यचिद्धर्मस्यान्तं न गच्छति। सत्वात्मप्रतिपावयिऽमन्यग्रग्रहस्य प्रत्यर्थवशेनैवमर्थं प्रज्ञापारमितायां चरति॥ एवमुक्ते आयुष्मान्सुभूतिर्भगवन्तमेतदवोचत्। यदा भगवन्पा
रमितानां नास्ति नानात्वं कथमियं प्रज्ञापारमिता यं चान्यासां पारमितानामग्रमाख्यायते श्रेष्ठाख्यायते ज्येष्ठाख्यायते वराख्यायते प्रवराख्यायते प्रणीताख्यायते उत्तमाख्यायते अनुत्तरा:

३८४

सिकारो यः सर्व्वपारमितानां सर्व्वशून्यतानां यः सप्तत्रिंशद्बोधिपक्ष्याणान्धर्म्माणाम्मनसिकारो य आर्य्यसत्याप्रमाणध्यानारूप्यसमापत्तीनाम्मनसिकारो यः शून्यतानिमित्ताप्रणिहितानां स
र्व्वविमोक्षसमाधिसमापत्तिधारणीमुखानाम्मनसिकारो योऽभिज्ञादशबलवैशारद्यप्रतिसंविदाम्मनसिकारो ऽष्टावेणिकबुद्धधर्म्माणाम्मनसिकारः यावदनुत्तरायाः सम्यक्संबोधे
र्म्मनसिकारः ॥ एवं स्थितस्य रूपमविगृहीतम्भवति ॥ यावत्सर्व्वाकारज्ञताविगृहीता भवति ॥ सुभूतिराह ॥ यदि भगवन्न रूपन्न मनसिकर्त्तव्यं न वेदना संज्ञा संस्कारा न विज्ञानं न मनसिः
कर्त्तव्यं एवं स्कन्धधात्वायतनप्रतीत्यसमुत्पादाः प्रतीत्यसमुत्पादाङ्गानि न मनसिकर्त्तव्यानि । सर्व्वपारमिताः सर्व्वशून्यताः सर्व्वबोधिपक्ष्या धर्म्मा आर्य्यसत्याप्रमाणध्यानारूप्यसमापत्तयः
शून्यतानिमित्ताप्रणिहिता विमोक्षसमाधिसमापत्तिधारणीमुखान्यभिज्ञादशबलवैशारद्यप्रतिसंविदावेणिकबुद्धधर्म्मा न मनसिकर्त्तव्याः सर्व्वाकारज्ञता न मनसिकर्त्तव्या ॥ कथम्भग
वन्न रूपम्मनसिकृत्वा वेदनां संज्ञां संस्कारान्न विज्ञानम्मनसिकृत्वा स्कन्धधात्वायतनप्रतीत्यसमुत्पादान्प्रतीत्यसमुत्पादाङ्गानि वा । मनसिकृत्वा सर्व्वपारमिताः सर्व्वशून्यताः सप्तत्रिंशद्बोः
धिपक्ष्यान्धर्म्मानार्य्यसत्यान्यप्रमाणध्यानारूप्यसमापत्तीः शून्यतानिमित्ताप्रणिहितविमोक्षसमाधिसमापत्तिधारणीमुखान्यभिज्ञादशबलवैशारद्यप्रतिसंविदावेणिकबुद्धधर्म्मान्न मनसि
कृत्वा सर्व्वाकारज्ञताम्मनसिकृत्वा कुशलमूलानि विवर्द्धन्ते कुशलमूलेष्वविवर्द्धमानेः कथं पारमिताः परिपूरयेदपरिपूर्य कथं सर्व्वाकारज्ञतामनुप्राप्स्यति ॥ भगवानाह ॥ यदा सु
भूते रूपन्न मनसिकरिष्यति न वेदनां न संज्ञान्न संस्कारान्न विज्ञानञ्चैनेन मनसिकरिष्यति ॥ स्कन्धधात्वायतनप्रतीत्यसमुत्पादान्प्रतीत्यसमुत्पादाङ्गानि न मनसिकरिष्यति । सर्व्वपारमिताः
सर्व्वशून्यताः सप्तत्रिंशद्बोधिपक्ष्यान्धर्म्मानार्य्यसत्याप्रमाणध्यानारूप्यसमापत्तीर्न मनसिकरिष्यति शून्यतानिमित्ताप्रणिहितविमोक्षसमाधिसमापत्तिधारणीमुखाभिज्ञान मनसिकरिष्य।

व सुभूते प्रज्ञापारमिता आसां पंचानां पारमितानामग्राख्यायते श्रेष्ठाख्यायते ज्येष्ठाख्यायते वराख्यायते प्रवराख्यायते प्रणीताख्यायते उत्तमाख्यायते अनुत्तमाख्यायते निरुत्तमाख्या-
यते असमाख्यायते असमसमाख्यायते॥ सुभूतिराह॥ कस्माद्भगवन् [illegible] प्रज्ञापारमिता अग्राख्यायते श्रेष्ठाख्यायते ज्येष्ठाख्यायते वराख्यायते प्रवराख्यायते प्रणीताख्यायते
उत्तमाख्यायते निरुत्तमाख्यायते असमाख्यायते असमसमाख्यायते॥ भगवानाह॥ तथाहि सुभूते प्रज्ञापारमिता सर्वान् कुशलान् धर्मान् गृहीत्वा येन सर्वाकारज्ञता तेन स्थास्यत्यस्थान-
योगेन॥ कृतिपृष्ठकनिर्याणविकल्पः ४॥ ८ ॥ शून्यकानवविधोद्दिशीयाग्रमक्षविकल्पः ४॥ ८ ॥ सुभूतिराह॥ किं पुनर्भगवन् प्रज्ञापारमिता कंचिद्धर्मं गृह्णाति वा मुञ्चति वा॥ भगवानाह॥
न सुभूते प्रज्ञापारमिता कंचिद्धर्मं गृह्णाति वा मुञ्चति वा॥ तत्कस्य हेतोः॥ तथाहि सुभूते सर्वधर्मा अगृहीता अमुक्ताः॥ सुभूतिराह॥ कतमान् भगवन् सर्वधर्मान् प्रज्ञापारमिता न गृह्णाति
न मुञ्चति॥ भगवानाह॥ रूपं सुभूते प्रज्ञापारमिता न गृह्णाति न मुञ्चति। न वेदनां न संज्ञां न संस्कारान् न विज्ञानं सुभूते प्रज्ञापारमिता न गृह्णाति न मुञ्चति॥ एवं स्कन्धधात्वायतनप्रतीत्यसमुत्पादं प्र-
तीत्यसमुत्पादाङ्गानि सुभूते प्रज्ञापारमिता न गृह्णाति न मुञ्चति॥ एवं सर्वपारमिताः ४ सर्वशून्यताः सप्तत्रिंशद्बोधिपक्ष्यान् धर्मान् आर्यसत्यान्यप्रमाणध्यानारूप्यसमापत्तीः ४ शून्यतानिमित्ताप्रणि- ३८४
हितानि सर्वविमोक्षसमाधिसमापत्तीः सर्वधारणीमुखान्यभिज्ञादशबलवैशारद्यप्रतिसंविदावेणिकान् बुद्धधर्मान्। अनुत्तरां सम्यक्संबोधिं सुभूते प्रज्ञापारमिता न गृह्णाति न मुञ्चति॥ ८ ॥
कृनियद्वयमार्गविकल्पः ४॥ ॥ सुभूतिराह॥ कथं भगवन् रूपमपरिगृहीतं भवति। कथं वेदना संज्ञा संस्काराः। कथं विज्ञानमपरिगृहीतं भवति॥ भगवानाह॥ यः सुभूते रूपस्यामनसि-
कारो वेदनाया अमनसिकारः ४ संज्ञाया अमनसिकारः। संस्काराणाममनसिकारः ४ विज्ञानस्यामनसिकारः ४ यः स्कन्धधात्वायतनप्रतीत्यसमुत्पादस्य प्रतीत्यसमुत्पादाङ्गानाममन-

वंवनत्तल ल याधिसत्त्वो महासत्त्वः सर्वाकारज्ञतायामपि न तिष्ठति। एवं हि तिष्ठन् न विकल्पयति॥ ७ ॥ सुभूतिराह॥ किमत्र भगवन् कारणं येन बोधिसत्त्वो महासत्त्वः सर्वज्ञतायामपि न तिष्ठति॥ भगवानाह। आत्मनः
रिति वागेन बोधिसत्त्वो महासत्त्वान्न कचिति तिष्ठति न क्वचिदेकान्तःस्थोऽपि सर्वधर्मान्न समनुपश्यति यत्र तिष्ठेत् न विशेषेण वा तिष्ठेत्॥ एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चर
न्न तिष्ठति न वा स्थास्यति न योगेन॥ एवमिति ता वा तावत् विकल्पयति न विकल्पयति॥ ७ ॥ एवं खलु बोधिसत्त्वो महासत्त्वः सर्वं एवं विकल्पयन् न प्रज्ञापारमितां भावयति एवं विभावयन् प्रज्ञापारमितायां चरन् प्रज्ञापा
रमितां भावयति। सूर्यं प्रज्ञापारमितायां चरन् प्रज्ञापारमितां भावयति। सर्वसंज्ञानी भवति। प्रज्ञापारमितां प्रज्ञापारमितायां द्वीरवति ध्यानपारमितायां वीर्यपारमि
तायां क्षान्तिपारमितायां शीलपारमितायां दानपारमितायां द्वीरवति॥ अध्यात्मशून्यतायां यावदभावस्वभावशून्यतायां द्वीरवति॥ स्मृत्युपस्थानसम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यंग
मार्गेषु द्वीरवत्यार्यसत्येषु ध्यानाप्रमाणसमापत्तिषु विमोक्षसमाधिसमापत्तिषु अभिज्ञासु शून्यतानिमित्ताप्रणिहितेषु दशबलवैशारद्यप्रतिसंविदावेणिकबुद्धधर्मेषु द्वीरवति।
न खलु पुनर्जानाति प्रज्ञापारमिताऽविरुद्धेति न विशेषः॥ न च प्रज्ञापारमितायाः कश्चिदिति न वशेऽस्मि॥ न खलु पुनर्ज्ञानात् ध्यानादौ नास्ति यत्र इति न विशेषः। एवं खलु बोधिसत्त्वो महासत्त्वः
प्रज्ञापारमितामपि संजानाति न च पुनर्बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां प्रज्ञापारमितायां सर्वधर्मेषु चरति॥ एवं चरन् प्रज्ञापारमितायां पारमितायां यदि गच्छ
ति सर्वक्लेशाः पञ्चस्कन्धधर्मान्नायसत्यानि ध्यानाप्रमाणसमापत्तिः यदि गच्छति शून्यतानिमित्ताप्रणिहितादीनध्यात्मशून्यतां यावदभावस्वभावशून्यतां यदि गच्छति विमोक्षसमाधिसमापत्तिः
रिति अभिज्ञा यदि गच्छति। अत इह दशबलवैशारद्यप्रतिसंविदावेणिकबुद्धधर्मान् यदि गच्छति। सर्वाकारज्ञतां यदि गच्छति न तत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां न चरति।

ति दशबलवैशारद्यप्रतिसंविदावेणिकबुद्धधर्मान्न मनसिकरिष्यति। यावदनुत्तरां सम्यक्संबोधिं न मनसिकरिष्यति। तदा बोधिसत्त्वस्य महासत्त्वस्य कुशलमूलानि विवर्द्धिष्यन्ते यावत्स
र्वाकारज्ञतामनुप्राप्स्यति॥ तत्कस्य हेतोः न मनसिकृत्वा हि रूपं वेदनां संज्ञां संस्कारान् विज्ञानममनसिकृत्वा स्कन्धधात्वायतनप्रतीत्यसमुत्पादान्प्रतीत्यसमुत्पादांगान्यमनसिकृत्वा स
र्वपारमिताः सर्वशून्यताः सप्तत्रिंशद्बोधिपक्ष्यान्धर्मानार्यसत्यान्यप्रमाणध्यानान्यारूप्यसमापत्तीः शून्यतानिमित्ताप्रणिहितविमोक्षसमाधिसमापत्तीः धारणीमुखानि दशबलवैशारद्यप्रतिसं
विदावेणिकान्बुद्धधर्मानमनसिकृत्वानुत्तरां सम्यक्संबोधिमभिसंभोत्स्यते॥ इति मनसिकारविकल्पाः॥ ७ ॥ सुभूतिराह॥ किमत्र भगवन्कारणं यन्न रूपममनसिकारं वेदनासंज्ञासंस्कारा
विज्ञानममनसिकारमेवं स्कन्धधात्वायतनप्रतीत्यसमुत्पादाः प्रतीत्यसमुत्पादांगानि वामनसिकाराणि सर्वपारमिताः सर्वशून्यताः सप्तत्रिंशद्बोधिपक्ष्या धर्मा आर्यसत्यान्यप्रमाणध्याना
न्यारूप्यसमापत्तयः शून्यतानिमित्ताप्रणिहितविमोक्षसमाधिसमापत्तयः धारणीमुखान्यपि दशबलवैशारद्यप्रतिसंविदावेणिकबुद्धधर्मा अमनसिकारा अनुत्तरा सम्यक्संबोधिरमनसि २८७
कारा॥ भगवानाह॥ अमनसिकारा यद्धि न श्लिष्यन्ते कामधातौ न श्लिष्यन्ते रूपधातौ न श्लिष्यन्त आरूप्यधातावमनसिकारा न कश्चिद्विश्लिष्यते॥ एवं खलु सुभूते बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमि
तायां स्थातव्यं यथा न कश्चिद्धर्मः श्लिष्यते॥ इति श्लेषकाश्लेषविकल्पाः॥ ७ ॥ सुभूतिराह॥ एवं च भगवन्बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां न क्वचित्स्थास्यति॥ भगवानाह॥ एवमेवं सुभूते बो
धिसत्त्वो महासत्त्वो रूपे न तिष्ठति वेदनायां संज्ञायां संस्कारेषु विज्ञाने न तिष्ठति॥ एवं स्कन्धधात्वायतनप्रतीत्यसमुत्पादे प्रतीत्यसमुत्पादांगेषु न तिष्ठति सर्वपारमितासु सर्वशून्यतासु सप्तत्रिं
शद्बोधिपक्ष्येषु धर्मेष्वार्यसत्येष्वप्रमाणध्यानारूप्यसमापत्तिषु शून्यतानिमित्ताप्रणिहितविमोक्षसमाधिसमापत्तिषु धारणीमुखेषु दशबलवैशारद्यप्रतिसंविदावेणिकबुद्धधर्मेषु न तिष्ठ

पृथक्त्वायुष्मान्सुभूतिर्भगवन्तमेतदवोचत्॥ कथम्भगवन्बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतः समवधानं भवति॥ भगवानाह॥ यदा सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमि-
तायां चरन्न कञ्चिद्धर्ममभिसंस्करोति सर्वधर्मा अपरिगृहीता नवागच्छा धर्मा अपरिगृहीताः कश्चिदपि संबुध्यन्ते स एवं बोधिसत्त्वः प्रज्ञापारमितायां स्थित्वा अपरिग्रहधर्ममतिरिति निरवगतवि-
रहिता प्रज्ञापारमितया। तत्कस्य हेतोः निर्दिष्टा प्रज्ञापारमितेति निर्विशेषेण वक्तव्या॥ सुभूतिराह किञ्चिद्विकल्पया॥ ~ ॥सुभूतिराह॥ किं पुनर्भगवन्प्रज्ञापारमिता प्रज्ञापारमितयाऽविरहिता ध्यान-
पारमिता ध्यानपारमितयाविरहिता वीर्यपारमिता वीर्यपारमितयाविरहिता क्षान्तिपारमिता क्षान्तिपारमितयाविरहिता शीलपारमिता शीलपारमितयाविरहिता दानपारमिता-
दानपारमितयाऽविरहिता। अध्यात्मशून्यता बहिर्धाशून्यतयाऽविरहिता। यावदभावस्वभावशून्यता भावस्वभावशून्यतयाऽविरहिता॥ स्मृत्युपस्थानानि स्मृत्युपस्थानैरविरहितानि।
सर्वसम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यङ्गानि। मार्गो मार्गेणाविरहितः। आर्यसत्यान्यार्यसत्यैरविरहितानि ध्यानाप्रमाणारूप्यविमोक्षसमाधिसमापत्तयो ध्यानाप्रमाणारूप्यविमो-
क्षसमाधिसमापत्तिभिरविरहिताः। शून्यतानिमित्ताप्रणिहितानि शून्यतानिमित्ताप्रणिहितैरविरहितानि। दशबलवैशारद्यप्रतिसंविदावेणिकबुद्धधर्मा दशबलवैशारद्यप्रति-
संविदावेणिकबुद्धधर्मैरविरहिताः। सर्वाकारज्ञता सर्वाकारज्ञतयाऽविरहिता॥ ॥एवं हि भगवन्प्रज्ञापारमिता प्रज्ञापारमितयाऽविरहिता। एवं ध्यानं वीर्यं क्षान्तिः शीलं दानपारमिता दा-
नपारमितयाऽविरहिता। यावत्सर्वाकारज्ञता सर्वाकारज्ञतयाऽविरहिता॥ सुभूतिराह किं प्रज्ञा विकल्पया॥ ~ ॥तत्कथं प्रज्ञापारमिता इति निर्देष्टव्या। एवं ध्यानवीर्यक्षान्तिःशीलं। तत्कथं दानपार-
मिता इति निर्देष्टव्या। यावत्तत्कथं सर्वाकारज्ञता इति निर्देष्टव्या॥ भगवानाह॥ इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्न रूपमिति नाभिनिविशते॥ इदं रूपं मम रूपमेवं वेदना।

प्रज्ञापारमिताविवर्द्धितेन गगनतुल्यां सम्यक्संबोधिमभिसंबोद्धुं ।। सचेत्पुनर्नैवं भवति कीदृश्यां प्रज्ञापारमितायां व्याकरिष्यत्यनुत्तरायां सम्यक्संबोधावक्षेयकुमा बोधिसत्वा महासत्वाः प्रज्ञापारमि-
तायाम् ।। सचेत्पुनर्नैवं भवति यदहमस्यां प्रज्ञापारमितायां स्थित्वा दानपारमितामभिनिर्हरिष्यामि शीलपारमितामभिनिर्हरिष्यामि । क्षान्तिपारमितामभिनिर्हरिष्यामि । वीर्यपारमिताम-
भिनिर्हरिष्यामि । ध्यानपारमितामभिनिर्हरिष्यामि ।। अध्यात्मशून्यतां यावदभावस्वभावशून्यतामभिनिर्हरिष्यामि ।। स्मृत्युपस्थानसम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यङ्गमार्गमभिनिर्हरि-
ष्याम्यार्यसत्याप्रमाणध्यानारूप्यसमापत्तीः शून्यतानिमित्ताप्रणिहितविमोक्षसमाधिसमापत्तिर्धारणीमुखान्यभिनिर्हरिष्यामि ।। न ह्यहं दशबलवैशारद्यप्रतिसंविदावेणिकबुद्धधर्मान-
भिनिर्हरिष्यामि । ये ते बोधिसत्वा महासत्वाः प्रज्ञापारमितायाम् ।। तत्कस्य हेतोर्नहि प्रज्ञापारमिताकृतस्य ध्यानपारमितावीर्यपारमिताक्षान्तिपारमिताशीलपारमितादानपारमिताकृ-
तस्य गक्षमभिनिर्हरणाय न हि स्मृत्युपस्थानसम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यङ्गमार्गकृतस्य गक्षमभिनिर्हरणाय न ह्यध्यात्मशून्यतायावदभावस्वभावशून्यताकृतस्य गक्षमः
भिनिर्हरणाय न ह्यार्यसत्याप्रमाणध्यानारूप्यसमापत्तिविमोक्षसमाधिसमापत्तिधारणीमुखाकृतस्य गक्षमभिनिर्हरणाय न हि शून्यतानिमित्ताप्रणिहिताभिज्ञाकृतस्य गक्षमभिनि-
र्हरणाय न हि दशबलवैशारद्यप्रतिसंविदावेणिकबुद्धधर्माकृतस्य गक्षमभिनिर्हरणाय न हि सर्वाकारज्ञताकृतस्य गक्षमभिनिर्हरणाय न हि महामैत्रीमहाकरुणाकृतस्य गक्षम-
भिनिर्हरणाय ।। सचेत्पुनर्नैवं भवति । अपरिगृहीता तथागतेन सर्वधर्माः स्वयमभिसंबुद्धा अभिसंबुध्याख्याता देशिताः प्रकाशिताः ये हि बोधिसत्वा महासत्वाः प्रज्ञापारमिता-
याम् ।। तत्कस्य हेतोर्नहि तथागतेन कश्चिद्धर्मोऽभिसंबुद्धस्तत्कस्य हेतोः स्वधर्मन्तयुरूपयानिकः पुनः कश्चिद्धर्ममभिसंभोत्स्यते न संस्कन्धं वियम ।। भूतिनवस्तुयुक्तापिपिकस्य ।। ।।

त्वानां पारमितानां प्रज्ञापारमिता सार्थं करोति सम्यग्मार्गेण नयेन सर्वाकारज्ञतानगरं गच्छति॥ इति कूटदर्शननिर्यासविकल्पा॥ ७ ॥ सुभूतिराह॥ कतमा भगवन् बोधिसत्त्वानां म
हासत्त्वानां मार्गः कतमो मार्गः॥ भगवानाह॥ श्रावकमार्गो बोधिसत्त्वानां महासत्त्वानां मार्गः प्रत्येकबुद्धमार्गो बोधिसत्त्वानां महासत्त्वानां मार्गः सर्वाकारज्ञतामार्गो बोधिसत्त्वा
नां महासत्त्वानां मार्गः॥ सर्वो सुभूते बोधिसत्त्वानां महासत्त्वानां मार्गो मार्गः॥ इति मार्गो मार्गज्ञानविकल्पः॥ सुभूतिराह॥ महाकरुणा भगवन् बोधिसत्त्वानां महासत्त्वानां प्रज्ञापारमिताः
प्रत्युपस्थिता॥ भवन्नयति प्रणयति॥ अयं मार्गो ऽयममार्ग इति॥ भगवानाह॥ एवमेतत्सुभूते एवमेतत् महाकरुणानेयं सुभूते बोधिसत्त्वानां महासत्त्वानां प्रज्ञापारमिता प्रत्युपस्थिता॥
एवन्नयति प्रणयति अयं मार्गो ऽयममार्ग इति। अप्रमेयाणामसंख्येयानामपरिमितानां सत्त्वानां कृतेन प्रत्युपस्थिता प्रज्ञापारमिता न कश्चित्सुभूते रूपं प्रणयति न रूपं प्रविगच्छति॥
न वेदनां न संज्ञां न संस्कारान्न विज्ञानं प्रविगच्छति। न श्रावकभूमौ वा न प्रत्येकबुद्धभूमौ वा प्रत्युपस्थिता। सा खलु पुनरियं प्रज्ञापारमिता बोधिसत्त्वस्य महासत्त्वस्य प्रविशयिका न त्वनायां
सम्यक्त्वा वा। यो श्रावकभूमेश्च प्रत्येकबुद्धभूमेश्चापनायिका सर्वाकारज्ञतायाश्चोपनायिका। एवमियं प्रज्ञापारमिता न कस्यचिद्धर्मस्योत्पादिका न निरोधिका धर्मस्थितितां प्रभावीः
कृता॥ सुभूतिराह॥ यदि भगवन् प्रज्ञापारमिता न कस्यचिद्धर्मस्योत्पादिका न निरोधिका कथं भगवन् बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरता दानं दातव्यं॥ कथं शीलं रक्षि
तव्यं कथं क्षान्तिर्भावयितव्या कथं वीर्यमारब्धव्यं कथं ध्यानं समापत्तव्यं। कथं प्रज्ञा भावयितव्या॥ भगवानाह॥ सर्वाकारज्ञतामारभ्य मनसीकृत्य दानं दातव्यं सर्वाकारज्ञतामारभ्य मनसीकृत्य शी
लं रक्षितव्यं सर्वाकारज्ञतामारभ्य मनसीकृत्य क्षान्तिर्भावयितव्या सर्वाकारज्ञतामारभ्य मनसीकृत्य वीर्यमारब्धव्यं सर्वाकारज्ञतामारभ्य मनसीकृत्य ध्यानं समापत्तव्यं सर्वाकारज्ञतामारभ्य म

संज्ञा संस्कारा विज्ञानमिति नाभिनिविशते । इदमिति ज्ञानमस्य विज्ञानम एवं स्कन्धधात्वायतनप्रतीत्यसमुत्पादाः प्रतीत्यसमुत्पादांगानि वा नाभिनिविशते ॥ इमे स्कन्धधात्वायतनप्रतीत्यसमु-
त्पादाः प्रतीत्यसमुत्पादाङ्गानि अस्य स्कन्धधात्वायतनप्रतीत्यसमुत्पादाः प्रतीत्यसमुत्पादाङ्गानीति ॥ एवं यावत्सर्वधर्म्मान्नाभिनिविशते । इमे सर्वधर्म्मा अस्य सर्वधर्म्मा इति । यन्नित्यतो वा
ऽनित्यतो वा दुःखतो वा सुखतो वा आत्मतो वा अनात्मतो वा शून्यतो वा अशून्यतो वा विविक्ततो वा अविविक्ततो वा न समनुपश्यति । वेदना संज्ञा संस्कारा विज्ञानं नित्यतो वा ऽनित्यतो वा दुःखतो वा सुखतो
वा आत्मतो वा अनात्मतो वा शून्यतो वा अशून्यतो वा विविक्ततो वा अविविक्ततो वा न समनुपश्यति । एवं स्कन्धधात्वायतनप्रतीत्यसमुत्पादाः प्रतीत्यसमुत्पादाङ्गानि वा नित्यतो वा ऽनित्य-
तो वा दुःखतो वा सुखतो वा आत्मतो वा अनात्मतो वा शून्यतो वा अशून्यतो वा विविक्ततो वा अविविक्ततो वा न समनुपश्यति । यावत्सर्वाकारज्ञतां नित्यतो वा ऽनित्यतो वा दुःखतो वा सुखतः
तो वा आत्मतो वा अनात्मतो वा शून्यतो वा अशून्यतो वा विविक्ततो वा अविविक्ततो वा न समनुपश्यति । तत्कस्य हेतोर्न हि धर्म्मा नित्यतो वा अनित्यतो वा दुःखतो वा सुखतो वा आत्मतो वा अ-
नात्मतो वा शून्यतो वा अशून्यतो वा विविक्ततो वा विविक्ततो वा अविविक्ततो वा न संविद्यन्ते । न हि स्वभावः स्वभावं न गच्छति । इति निर्द्दिश्यमायाः । स खलु पुनः सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापार-
मितायां स्थितो ध्यानपारमितायां वीर्यपारमितायां क्षान्तिपारमितायां शीलपारमितायां दानपारमितायां यावत्सर्वाकारज्ञतायां स्थित इति ॥ तद्यथापि नाम सुभूते राज्ञश्चक्रवर्त्तिनश्चतु-
रङ्गबलकायो येन येन स राजा गच्छति तेन तेनानुवर्त्तते । एवमेव सुभूते येन येन प्रज्ञापारमिता गच्छति तेन तेन पञ्चपारमिता अनुवर्त्तन्ते ॥ येन सर्वाकारज्ञता तेन स्पृशन्ति । इ-
ति यत्र गच्छ गमने व्याघातविकल्पाः ॥ इत्यज्ञानं वा विषयस्पृथमाग्रादकविकल्पाः ॥ ॥ तद्यथापि नाम सुभूते सारथिश्चतुर्युक्तमरिसृष्टसत्त्वान्मार्गेन गच्छति ॥ एवमेव सुभूते प्रज्ञायां

यत्र न सर्व्वशून्यतासु न सप्तत्रिंशत्सु बोधिपक्ष्येषु धर्म्मेषु नार्य्यसत्याप्रमाणध्यानारूप्यसमाधिसमापत्तिष्वाभिज्ञासु न शून्यतानिमित्ताप्रणिहितेषु न दशबलवैशारद्यप्रतिसंवित्स्वावेणिकेषु बुद्धधर्म्मे-
षु स्वामीति योगः करणीयः। न सर्व्वाकारज्ञतायां स्वामीति योगः करणीयः॥ तत्कस्य हेतोः। नात्र रूपं वा काङ्क्षितं विचिकित्सितं न वेदना न संज्ञा न संस्कारा न विज्ञानं काङ्क्षितं विचिकित्सितं न स्कन्धधात्वायतनप्रतीत्यसमुत्पादाः
प्रतीत्यसमुत्पादाः काङ्क्षिता विचिकित्सितानि। एवं न पारमितानां शून्यतानां बोधिपक्ष्यधर्म्माणां नार्य्यसत्याप्रमाणध्यानारूप्यविमोक्षसमाधिसमापत्तिष्वभिज्ञाविमोक्षमुखानि न दशबलवैशारद्यप्रति-
संविदावेणिकबुद्धधर्म्माः काङ्क्षिता विचिकित्सिता न सर्व्वाकारज्ञता काङ्क्षिता विचिकित्सिता। एवमहमनेन यानेन बोधिसत्त्वेन महासत्त्वेनानुत्तरा सम्यक्संबोधिरभिसंबोद्धव्या॥ इति निर्याणादिस्कन्धविकल्पः॥ ॥ तद्यथापि ना-
म सुभूते पुरुषः स्वप्रवृत्तानि वापन सप्रवृत्तस्वा रुकयितुकामः स्यान्नाप्रवृत्तं पन सप्रवृत्तस्वा द्वेषायिकव्यामव पापवादकं कान्तानुकारान्दा नवां कत्तायिकव्यं न स्यान् पूर्व्वंगमस्व ह्यमानस्य
मायासामग्रीं स्वरमानस्याप्रवृत्तैर्व्वा पन सप्रवृत्तैर्व्वा सामग्रीरविषयकिं समतान्याप्रवृत्तानि वापन सप्रवृत्तानि वारक्षिष्यन्नेवमेव सुभूते बोधिसत्त्वो महासत्त्वोऽनुत्तरां सम्यक्संबोधिमभिसंबोद्धुकामः ष-
ट्सु पारमितासु शिक्षितव्यम्। सत्त्वान्दानेनानुगृह्णीयात् शीलेन क्षान्त्या वीर्य्येण ध्यानेन प्रज्ञयानुगृह्णीयात्। सत्त्वान्संसाराद्विमोचयिष्यामि॥ इति लोकानुग्रहविकल्पः॥ ० ॥ तस्मात्तर्हि सुभूते बो-
धिसत्त्वेन महासत्त्वेन न्यायावक्रान्तिकां गन्तुकामेन बुद्धक्षेत्रं परिशोधयितुकामेन बोधिमण्डे निषीदितुकामेन धर्म्मचक्रं प्रवर्त्तयितुकामेन षट्सु पारमितासु शिक्षितव्यं॥ सुभूतिराह। प्रज्ञापा-
रमितया॥ भगवन् प्रज्ञापारमितायां शिक्षितव्यमिति वदसि॥ भगवानाह। प्रज्ञापारमितया सुभूते प्रज्ञापारमितायां शिक्षितव्यमिति वदामि। सर्व्वधर्म्मवशितामनुप्राप्तुकामेन प्रज्ञापारमिता-
यां शिक्षितव्यं इति वदामि॥ इति प्रार्थनारत्नविकल्पः॥ ॥ तत्कस्य हेतोः। प्रज्ञापारमितया सर्व्वधर्म्मवशितामनुप्राप्यते। तथा हि प्रज्ञापारमिता सर्व्वधर्म्माणां मुखं॥ तद्यथापि नाम

यीकृत्य पुनरुत्तरावयितव्या ॥ कथं च बोधिसत्त्वेन महासत्त्वेन तानि कुशलमूलानि सर्व्वसत्त्वेभ्यः साद्धं साधारणं कृत्वानुत्तरायां सम्यक्संबोधौ परिणामयितव्यानि तथा परिणामयितव्यानि यथास्यात्त्रिविधबुद्धिर्न
रुवति कथं त्रयपरिणामयति ॥ किमर्थाय परिणामयति कुत्र वा परिणामयति । एवं बोधिसत्त्वस्य महासत्त्वस्य ॐ मां कुशलान्धर्म्मानि न रूपं नायें समन्यक्त्वाध्ययययति परिणामयति ॥ षट्पारमिता भावनायां परिपूरि
कद्रुकियावद्बोधिसत्त्वस्य महासत्त्वस्य मैत्रीभावनायां परिपूरिं कुर्युरि यावत्सर्व्वाकारज्ञतायां भावनायां परिपूरिं कुर्युरिति ॥ यः कश्चिद्बोधिसत्त्वो महासत्त्वः षट्सु पारमितासु विनिर्दिता ॥ सर्व्वाका
रज्ञतायाः विनिर्दिता रुवति ॥ तस्माद्बोधिसत्त्वेन महासत्त्वेनानुत्तरां सम्यक्संबोधिमभिसंबोद्धुकामेन षट्सु पारमितासु शिक्षितव्यं षट्सु पारमितासु चरन्बोधिसत्त्वो महासत्त्वः सर्व्वान्कुशलान्धर्म्माः
न्परिपूर्य्य सर्व्वाकारज्ञतामनुप्राप्स्यति ॥ तस्माद्बोधिसत्त्वेन महासत्त्वेन षट्सु पारमितासु योगः करणीयः ॥ ॐ तत्र दानादीनि षड्विकल्पाः ॥ ॥ तत्र विवाद ॥ कथं भगवन्बोधिसत्त्वेन महासत्त्वेन
षट्सु पारमितासु योगः करणीयः ॥ भगवानाह ॥ ॐ इह सुभूते बोधिसत्त्वेन महासत्त्वेन अध्यात्मशून्यतायां रूपं न संयुक्तं नो विसंयुक्तं वेदना संज्ञा संस्कारा विज्ञानं न संयुक्तं नो विसंयुक्तं । एवं स्कन्धधा
त्वायतनप्रतीत्यसमुत्पादाः प्रतीत्यसमुत्पादाङ्गानि न संयुक्तानि न संयुक्तानि । एवं सर्व्वपारमिताः सर्व्वे शून्यताः सप्तत्रिंशद्बोधिपक्ष्या धर्म्माः ॥ आर्य्यसत्यानि ध्यानाप्रमाणारूप्यसमापत्तयः शून्यतानि
मित्ताप्रणिहितानि सर्व्वविमोक्षसमाधिसमापत्तयश्च सर्व्वधारणीसमाधिमुखानि दशबलवैशारद्यप्रतिसंविदावेणिका बुद्धधर्म्मा न संयुक्ता न विसंयुक्ता । एवं खलु सुभूते बोधिसत्त्वेन महासत्त्वेन षट्सु पारमिता
सु योगः करणीयः ॥ ॐ निःसंयोगविसंयोगविकल्पा ॥ ॥ पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन न रूपे स्थास्यामीति योगः करणीयः । न वेदनायां न संज्ञायां न संस्कारेषु न विज्ञाने स्थास्यामीति यो
गः करणीयः । एवं स्कन्धधात्वायतनप्रतीत्यसमुत्पादेषु न स्थास्यामीति योगः करणीयः । न प्रतीत्यसमुत्पादाङ्गेषु न स्थास्यामीति योगः करणीयः । एवं न सर्व्वपारमितासु स्थास्यामीति योगः करणी

३८९

४३

न्या

न्ति॥ अध्यात्मशून्यतायां चरन्तं बोधिसत्त्वं महासत्त्वं समन्वाहरन्ति॥ यावदभावस्वभावशून्यतायां चरन्तं बोधिसत्त्वं महासत्त्वं समन्वाहरन्ति॥ स्मृत्युपस्थानसम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यंग
मार्गेषु चरन्तं मार्य्यसत्येषु ध्यानाप्रमाणारूप्यविमोक्षसमाधिसमापत्तिधारणीमुखेषु चरन्तं महाशून्यतानिमित्ताप्रणिहितेषु चरन्तं दशबलवैशारद्यप्रतिसंविदावेणिकबुद्धधर्म्मेषु
चरन्तं। कथं सर्व्वाकारज्ञतायां चरन्तं बोधिसत्त्वं महासत्त्वं समन्वाहरन्ति॥ एवमुक्ते भगवानायुष्मन्तं सुभूतिमेतदवोचत्॥ इह सुभूते अमीला नाम तथागताः स्वन्तो बुद्धा भगवन्तो बोधिसत्त्वं महा
सत्त्वं प्रज्ञापारमितायां चरन्तं समन्वाहरन्ति॥ तथा च समन्वाहरन्ति यथा नैव दानं न शीलं न क्षान्तिं न वीर्य्यं न ध्यानं न प्रज्ञां पश्यन्ति॥ एवमनुपलम्भेन बोधिसत्त्वं महासत्त्वं समन्वाहरन्ति॥ यावन्नाध्यात्मशून्य
तां यावदभावस्वभावशून्यतां॥ न स्मृत्युपस्थानं न सम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यंगमार्गान्नानुपश्यन्ति न पश्यन्त्यार्य्यसत्याप्रमाणध्यानारूप्यविमोक्षसमाधिसमापत्तिधारणीमुखान्यभिज्ञाः शून्यतानिमित्ताप्रणिहितानि दशबल
वैशारद्यप्रतिसंविदावेणिकबुद्धधर्म्मान्नापश्यन्ति॥ यावत्सर्व्वाकारज्ञतां नापश्यन्ति॥ एवमनुपलम्भयोगेन बोधिसत्त्वं महासत्त्वं समन्वाहरन्ति॥ पुनरपरं सुभूते बुद्धा भगवन्तो बोधिसत्त्वं महासत्त्वं न रूपतः समन्
वाहरन्ति॥ न वेदनातो न संज्ञातो न संस्कारतो न विज्ञानतः समन्वाहरन्ति॥ न स्कन्धतो न धातुतो नायतनतो न प्रतीत्यसमुत्पादतो न प्रतीत्यसमुत्पादाङ्गतः समन्वाहरन्ति॥ न दानपारमितातो न शीलपारमितातो न क्षा
न्तिपारमितातो न वीर्य्यपारमितातो न ध्यानपारमितातो न प्रज्ञापारमितातः समन्वाहरन्ति॥ नाध्यात्मशून्यतातो यावन्नाभावस्वभावशून्यतातः समन्वाहरन्ति॥ न स्मृत्युपस्थानतो न सम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यं
गमार्गतः समन्वाहरन्ति॥ नार्य्यसत्यतो न ध्यानारूप्यविमोक्षसमाधिसमापत्तिधारणीमुखतः समन्वाहरन्ति॥ न शून्यतानिमित्ताप्रणिहितेभ्यो दशबलवैशारद्यप्रतिसंविदावेणिकबुद्धधर्म्मतः समन्वाहरन्ति॥ न सर्व्वाः
कारज्ञतातः समन्वाहरन्ति॥ ॐ॥ विप्रलम्भिकधर्म्मा यत्नतो विकल्प्य॥॥ ॐ स्वरूपकानवविधोद्दिनीयायाग्रादकविकल्पः॥॥ ७ ॥ अथ खलु सम्बहुलाः सत्त्वाः शक्रो देवानामिन्द्र एतदवोचत्। यत्ते कौशिक एवमवदस्ति गम्भीर

सद्दन्त महासमुद्रः सर्व्वरत्नानां सर्व्वरत्नविकामुखं सर्व्वनदीउत्तानि समुद्रं विष्टान्येकरसानि भवन्ति एवमेव प्रज्ञापारमिता सर्व्वधर्म्माणां मुखं। सर्व्वधर्म्मादिप्रज्ञापारमिताविकाशप्रज्ञापा
रमिता भवन्ति। तस्मात्तर्हि श्रावकयानिकैर्व्वा प्रत्येकबुद्धयानिकैर्व्वा बोधिसत्वयानिकैर्व्वा पुद्गलैर्वि देवप्रज्ञापारमितायां। तस्माद्बोधिसत्वेन महासत्वेन दानपारमितायां शिक्षितव्यं। शीलपारमि
तायां शिक्षितव्यं क्षान्तिपारमितायां शिक्षितव्यं। वीर्य्यपारमितायां शिक्षितव्यं ध्यानपारमितायां शिक्षितव्यं प्रज्ञापारमितायां शिक्षितव्यं॥ अध्यात्मशून्यतायां शिक्षितव्यं बहिर्द्धाशून्यतायां शिक्षितव्यं।
अध्यात्मबहिर्द्धाशून्यतायां शिक्षितव्यं। यावदभावस्वभावशून्यतायां शिक्षितव्यं॥ स्मृत्युपस्थानेषु शिक्षितव्यं॥ एवं सम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यङ्गमार्गेषु शिक्षितव्यं आर्यसत्याप्रमाण
ध्यानारूप्यसमाधिसमापत्तिधारणीमुखेषु शिक्षितव्यं॥ शून्यतानिमित्ताप्रणिहितेषु शिक्षितव्यं दशबलवैशारद्यप्रतिसम्वित्सु शिक्षितव्यमष्टादशस्वावेणिकेषु बुद्धधर्म्मेषु शिक्षितव्यं॥
सर्व्वाकारज्ञतायां शिक्षितव्यं॥ शून्यतिदत्तरावविकस्य॥ ॥ तद्यथापि नाम सुभूते क्षुद्रकावार्या यथानुपूर्व्वं चतुर्द्वीपकाद्बलवर्षाणि बलचक्रवर्त्तिकानां वाप्रत्यमित्रा गम्या। एवमेव सुभू ३८
ते बोधिसत्वो महासत्वः प्रज्ञापारमितायां चरन्ननुद्रवादधर्षणीयो भवति। मारैर्व्वा मारकायिकाभिर्व्वा देवताभिस्तस्मात्तर्हि सुभूते बोधिसत्वेन महासत्वेनानुत्तरां सम्यक्सम्बोधिमभिसम्बोद्धुका
मेन प्रज्ञापारमितायां शिक्षितव्यं। तत्र प्रज्ञापारमितायां चरन्तं महेशाख्या नागरूपपृष्ठतः समनुबद्धा रक्षावरणगुप्तयः समन्वाहरन्ति॥ एवमुक्त आयुष्मान्सुभूतिर्भगवन्तमेतदवोचत्। कथं भगवन्बुद्धा
भगवन्तो दानपारमितायां चरन्तं बोधिसत्वं महासत्वं समन्वाहरन्ति। शीलपारमितायां चरन्तं बोधिसत्वं महासत्वं समन्वाहरन्ति। क्षान्तिपारमितायां चरन्तं बोधिसत्वं महासत्वं समन्वाः
हरन्ति। वीर्य्यपारमितायां चरन्तं बोधिसत्वं महासत्वं समन्वाहरन्ति। ध्यानपारमितायां चरन्तं बोधिसत्वं महासत्वं समन्वाहरन्ति। प्रज्ञापारमितायां चरन्तं बोधिसत्वं महासत्वं समन्वाहर

न्यवनायितव्यं । कः पुनर्वादाय शून्यतानिमित्ताप्रणिहितानि श्रावयन्ति ॥ ध्यानविमोक्षसमापत्तिष्वभिमुखान्यवनायितव्यं । कः पुनर्वादाय ध्यानविमोक्षसमाधिसमापत्तिष्वभिमुखानि श्रावयन्ति ।
तथागतबलान्यवनायितव्यं । कः पुनर्वादाय बलानि श्रावयन्ति । वैशारद्यान्यवनायितव्यं । कः पुनर्वादाय वैशारद्यानि परिनिर्दिशन्ति । प्रतिसंविदवनायितव्यं । कः पुनर्वादाय प्रतिसंविदः परिनिर्दिश-
न्ति । महामैत्र्यवनायितव्यं । कः पुनर्वादाय मैत्रीं श्रावयन्ति । महाकरुणामवनायितव्यं । कः पुनर्वादाय महाकरुणाविहारं श्रावयन्ति । आवेणिकानव बुद्धधर्म्मान्वायितव्यं ॥ कः पुनर्वादाय आवे-
णिकान् बुद्धधर्म्मान् परिनिर्दिशन्ति । अनुत्तरां सम्यक्संबोधिमवनायितव्यं । कः पुनर्वादाय अनुत्तरां सम्यक्संबोधिमभिसंभोत्स्यन्ते । सर्वाकारज्ञतामवनायितव्यं । कः पुनर्वादाय सर्वाकारज्ञतामनुप्रा-
प्स्यन्ति । तथागतत्वमवनायितव्यं । कः पुनर्वादाय तथागतत्वं प्रतिपत्स्यन्ते त्यादमवनायितव्यं । कः पुनर्वादाय स्त्यादं सामान्यूर्वन्ति । तत्त्रैशान्यवनायितव्यं कः पुनर्वादायेषां तत्त्रैशानिकाय श्रावयन्ति ।
अनुत्तरज्ञानान्यवनायितव्यं । कः पुनर्वादाय षामनन्ययानुत्तरज्ञानाधिकाय श्रावयन्ति ॥ तत्कस्य हेतोः ॥ सर्वधर्म्मविविक्तविहारी कौशिक सुभूतिः । शून्यताविहारी अनिमित्तविहारी अप्रणि-
हितविहारी कौशिक सुभूतिः । स्थविरस्य विहारस्य बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो विहारस्य शततमीमपि कलां नोपैति सहस्रतमीमपि शतसहस्रतमीमपि
कोटीतमीमपि कोटीशततमीमपि कोटीसहस्रतमीमपि कोटीशतसहस्रतमीमपि संख्यामपि कलामपि गणनामप्युपमामप्यौपम्यमप्युपनिशामप्युपनिषदमपि नोपैति ॥ तत्कस्य हेतोः ॥ तथा हि तथागतविहारं स्थापयि-
त्वा बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो विहारः सर्वश्रावकप्रत्येकबुद्धानां ये विहारास्तेषां विहाराणामयं बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो विहारः ॥ अग्र आख्याय-
यते । ज्येष्ठ आख्यायते । श्रेष्ठ आख्यायते । वर आख्यायते । प्रवर आख्यायते । प्रणीत आख्यायते । उत्तम आख्यायते । अनुत्तम आख्यायते । निरुत्तम आख्यायते ॥ तस्मात्तर्हि कौशिक बोधिसत्त्वेन महासत्त्वेनाग्रतां

यद्भगवत्प्रज्ञापारमिताइस्कवकानका बोधिसत्वा महासत्वा यां गम्भीरधर्म्मे निरावन्ति कांक्षायितत्वम्वा धन्धायितत्वम्वा शून्याः कौशिक सर्व्वधर्म्माः क अत्र कांक्षायितत्वम्वा भविष्यति॥ एवमुक्ते शक्रो देवा
नामिन्द्रः स्थविरं सुभूतिमेतदवोचत्॥ यद्यदेव स्थविरः सुभूतिर्निर्दिशति सर्व्वन्तच्छून्यतामारभ्य निर्दिशति न क्वचित्सज्जति॥ तद्यथापि नाम भदन्तेषुर्गगने क्षिप्तो न क्वचित्सज्जति॥ एवमेव स्थविरस्य सुभूतेर्धर्म्मदेश
ना न क्वचित्सज्जति॥ अथ खलु शक्रो देवानामिन्द्रो भगवन्तमेतदवोचत्॥ कच्चिदहं भगवन्नेवं भाषमाण एवं निर्दिशन्भूतवादी च भगवतो धर्म्मवादी च धर्म्मस्य चानुधर्म्मं सम्यग्व्याकर्त्तुं व्याकरो
मि॥ भगवानाह॥ सम्यक्खलु त्वं कौशिक एवं भाषमाण एवं निर्दिशंस्तथागतस्य भूतवादी च धर्म्मवादी च धर्म्मस्य चानुधर्म्मं व्याकरोषि॥ देवेन्द्र आह॥ आश्चर्यं भगवन् यावदेव स्थविरः सुभूतिः
युमि सर्व्वज्ञशून्यतां चैव न समनुपश्यतीति॥ आनिमित्तं चैवाप्रणिहितं चैव न समनुपश्यतीति॥ स्कन्धधात्वायतनान्यपि न समनुपश्यति स्मृत्युपस्थानसम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यङ्गमार्गमपि न समनुपश्यतीति॥ अध्यात्मशून्य
तां यावदभावस्वभावशून्यतां न समनुपश्यतीति यावदनुत्तरां सम्यक्संबोधिमपि न समनुपश्यतीति॥ एवमुक्ते भगवान् शक्रं देवानामिन्द्रमेतदवोचत्॥ स्थविरः कौशिक सुभूतिः शून्यतायां विहरन्दान: ३०
पारमितां चैव नोपलभते॥ कः पुनर्वादो यद्दानपारमितायां चरन्ति शीलपारमितायां चरन्ति॥ क्षान्तिपारमितायां चरन्ति॥ वीर्यपारमितायां चरन्ति॥ ध्यानपारमितायां चरन्ति॥ प्रज्ञापार:
मितां चैव नोपलभन्ते॥ कः पुनर्वादो यत्प्रज्ञापारमितायां चरन्ति॥ स्कन्धधात्वायतनान्येव नोपलभन्ते॥ कः पुनर्वादो यत्स्कन्धधात्वायतनानि निरोधयन्ति॥ स्मृत्युपस्थानसम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यङ्गमार्गमप्येव नोपलभन्ते॥
कः पुनर्वादो यत्स्मृत्युपस्थानसम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यङ्गमार्गं भावयन्ति॥ अध्यात्मशून्यतां यावदभावस्वभावशून्यतां नोपलभन्ते॥ कः पुनर्वादो यदध्यात्मशून्यतां यावदभावस्वभावशून्यतां भावयन्ति॥ आ
र्यसत्यान्यपि नोपलभन्ते॥ कः पुनर्वादो यदार्यसत्यानि निरोधयन्ति॥ अप्रमाणध्यानारूप्यसमापत्तीर्नोपलभन्ते॥ कः पुनर्वादो यदप्रमाणध्यानारूप्यसमापत्तीर्भावयन्ति॥ शून्यतानिमित्ताप्रणिहित

तं भविष्यति समसमायुःप्रमाणं भविष्यति विंशतिवर्षसहस्राणि ते तत्र कारिनिष्क्रम्य सूरिनिष्क्रमाय प्रव्रजिष्यन्ति एवं ते च यत्र यत्र विहरिष्यन्ति तत्र तत्र पञ्चवर्णिकानां कुसुमानां कुसुमवर्षाणि
प्रपतिष्यन्ति तस्मादानन्द उत्तमं विहारं विहर्त्तुकामेन वोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरितव्यं तथागतविहारं विहर्त्तुकामेन वोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां चरि
तव्यं ॥ ७ ॥ रुत्वान्येषां सहावासो महन्दर्शनि प्रथमकावर्त्तः ॥ ७ ॥ यदि कश्चित् कुलपुत्रो वा कुलदुहिता वा इदं गम्भीरायां प्रज्ञापारमितायां चरिष्यति निष्ठागतेनानन्द कुलपुत्रेण वा कुलदुहित्रा वा एवं गन्तव्या:
मनुष्येभ्यो वा देवेभ्यश्च्युत्वा इहोपपन्नः तुषिताद्वा देवनिकायाच्च्युत्वा इहोपपन्न इति ॥ मनुष्येष्वियं गम्भीरा प्रज्ञापारमिता विस्तरेण समुदाचरिष्यति तुषितेषु देवेष्वियं गम्भीरा प्रज्ञापारमिता विस्तरेण प्रचा
रो भविष्यति तथागतव्यवस्थापयितास्मानन्द वोधिसत्त्वो महासत्त्वो भविष्यति य इदं गम्भीरायां प्रज्ञापारमितायां चरिष्यति यः कश्चिदानन्द कुलपुत्रो वा कुलदुहिता वा इमां गम्भीरां प्रज्ञापारमितामुद्ग्र
हीष्यति धारयिष्यति वाचयिष्यति पर्यवाप्स्यति योनिशश्च मनसिकरिष्यति ॥ वोधिसत्त्वयानिकानां वा पुद्गलानामिमां गम्भीरां प्रज्ञापारमितामुपदेक्ष्यत्युपदर्शयिष्यति । निष्ठागतेनानन्द कुलपुत्रेण वा कुलदुहित्रा
वा एवं गन्तव्यं सम्मुखं मया तेषां तथागतानामर्हतां सम्यक्संवुद्धानामन्तिकादियं गम्भीरा प्रज्ञापारमिता श्रुता उद्गृहीता धारिता वाचिता पर्यवाप्ता वा इति । ते एवं तथागतैरर्हद्भिः सम्यक्संवुद्धैः कृतपूर्वकम
समवधायितव्यमस्माभिरिह श्रवणकाले सम्मुखं तथागतानामन्तिकात् सम्मुखं समवधारितेन श्रावकाणामन्तिकादियं गम्भीरा प्रज्ञापारमिता श्रुतेति ॥ यः कश्चिदानन्द कुलपुत्रो वा कुलदुहिता वा इमां गम्भीरां प्रज्ञापारमितामुद्ग्रहीष्य
ति धारयिष्यति वाचयिष्यति पर्यवाप्स्यति । अर्थतश्च व्यञ्जनतश्चानुगमिष्यति निष्ठागतेनानन्द कुलपुत्रेण वा कुलदुहित्रा वा एवं गन्तव्यं सम्मुखीभूतोऽस्माकं तथागतानामर्हतां सम्यक्संवुद्धानामिति ॥ यः क
श्चिदानन्द कुलपुत्रो वा कुलदुहिता वा इमां गम्भीरां प्रज्ञापारमितां श्रुत्वा न प्रतिक्षेप्स्यति न प्रतिवदिष्यति प्रसादयिष्यति तस्य म ॥ पूर्वजिनकृताधिकारस्य स आनन्द कुलपुत्रो वा कुलदुहिता

गन्धकामनानेन विदारयश्चविदर्ल्यंयइनयस्यपायमिका विदारयश्चा ॥ तत्क्षणदेवा ॥ तत्र दिकालिकयस्यायात्मिका याश्चैवंवाविमस्त्वा मस्नामत्वाश्रवकपत्यकवद्धरत्निमनिकामति ॥ वाविसत्त्वनियाममव
कामति ॥ बुद्धधर्म्मान्यविपूजयति ॥ सत्त्वाकायहन्ता मनप्राप्यति सर्व्वाकायहन्तामनप्राप्य तथागतार्हन्तस्सम्यक्संबुद्धः सर्व्ववासनानन्तस्तिक्रुगएदाशारविष्यति ॥ अथ खलु त्वकस्यायंषदि देवात्मस्तुयन्तिंग्म
मान्दानवास्ति पृच्छति स्मदीत्वा भगवन्तमेवकियन्ति किस्मारयवकियन्ति किस्मारियकियन्ति किस्मायष्ठि अशरिकृत्संगतम क्यायामतत्यन्न कागश्रीव वंयावृत्यदक्षिंजानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेना
ञ्जलिंप्रणम्यामात्स ॥ तयांचरिकृत्ससमअर्हत्स्य ध्यपश्चामिनाबुद्धानं भगवन्तमान्दानवैरपृच्छेः यथिपर्श्चसुरत्वंस्त्वमान्दानवैरपृच्छेस्तथागतमर्हन्तं सम्यक्संबुद्धमवकियन्ति किस्मारयवकियन्ति किस्मारियकिय
न्ति किस्मावकियन्ति कार्श्चकियन्ति कार्श्चरियकियन्ति नवश्चवाचमदीययन्ति किस्मवयम्हगवन्तेनोनकगतमस्सनचगनाल मनविदारयश्चविदस्ति प्यामायतनागति ॥ सर्व्वश्रावकबुद्धानामिति ॥ अथ खलु भगवांस्तस्यां वेलायां
तयांतिकृत्ससमथागतयांविदित्वा स्मितंप्राविष्कृतवानि स्मा ॥ धर्म्मता खलु पुनर्यदा बुद्धा भगवन्तो यदास्मितंप्राद्धष्कुर्व्वन्ति तदा तस्मकावर्ष्मीनानावर्ण्णा अर्चिषो भगवतो मुखान्निश्चरन्ति स्म ॥ तद्यथा नीलाः
पीतालोहितावदातामाञ्जिष्ठाः भगवतश्शम्लिसादम्रमसासादस्रं लोकधातुं भवरत्नास्पुनरेवागत्य बुद्धो भगवन्तं त्रिःप्रदक्षिणीकृत्य भगवतो मूर्द्धन्यन्तर्हिताः ॥ अथ खल्वायुष्मानानन्दः कृत
यासनादकांसचीवरं प्रावृत्य दक्षिणजानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिंप्रणम्य भगवन्तमेतदवोचत् ॥ को भगवन्हेतुः कः प्रत्ययस्स्मितस्य प्राडुष्करणाय नाहेतुकंनाप्रत्ययन्तथा
गता अर्हन्तस्सम्यक्संबुद्धास्स्मितंप्राडुष्कुर्व्वन्ति ॥ एवमुक्ते भगवानायुष्मन्तमानन्दमेतदवोचत् ॥ एवमान्यानन्द यष्ठिरीकृ भगवानिजनागतेऽध्वनि मानकायमकत्वा नहत्वां सम्यक्संबोधिमभिसंबुद्धाः
त्सपन्न भवकीर्त्तिकृत्समनामानस्तथागता अर्हन्तः सम्यक्संबुद्धा भविष्यन्ति ॥ तथा खलु पुनर्यानन्दावकिर्द्धिकृत्समन्तामन्तां तथागतानामर्हतां सम्यक्संबुद्धानां समसमारिकृत्संघा भविष्यति समसमवद्धा

ज्ञानात् भगवतां स्वाधिष्ठितां परिगृहीतां करिष्यामि।। यः कश्चिदानन्ददिमां सम्मुखीभूतः कुलपुत्रो वा कुलदुहिता वा सत्कुर्याद्गुरुकुर्यान्मानयेत्पूजयेत्तस्य धूपगन्धमाल्यविलेपनवस्त्रचीवर
च्छत्रध्वजपताकाभिः अनयेमां गम्भीरां प्रज्ञापारमितां उद्गृहीतया धारितया वाचितया पर्यवाप्तया योनिशश्च मनसिकृतया सत्कृतया गुरुकृतया मानितया पूजितया पुष्पधूप
गन्धमाल्यविलेपनवस्त्रचूर्णचीवरच्छत्रध्वजपताकाभिः प्रज्ञापारमितां सत्कुर्वन् गुरुकुर्वन् मानयत्पूजयत्केन पूजिता भवामि।। अतीतानागतप्रत्युत्पन्नाश्च बुद्धा भगवन्तः पूजिता भवन्ति। यः
कश्चिदानन्द कुलपुत्रो वा कुलदुहिता वा इमां गम्भीरां प्रज्ञापारमितां राधयिमानां शुश्रूषा गौरवं प्रसादं वोत्पादयिष्यति। अतीतानागतप्रत्युत्पन्नानां बुद्धानां भगवतामन्तिके तेन गौरवं प्र
सादश्चोत्पादितो भविष्यति यथा ते इदमानन्द प्रियश्चासन्नः अप्रियश्चापि तथा त्वयेयं गम्भीरा प्रज्ञापारमिता प्रिया मनापा यास्या अपरित्यक्ता भवतु यथा एकपदमपि न इमां गम्भीरायाः प्रज्ञापार
मितायानन्तर्धापयितव्यं।। बहु अपि ते आनन्द अस्याः प्रज्ञापारमितायाः परिन्दनामारभ्य न संक्षिप्य पुनरनन्त यावद् इदं गम्भीरायाः शीघ्रं प्रज्ञापारमिता भाषा।। तस्मात्तर्हि आनन्द प्रज्ञापारमितायाः अनुपरमा
नानि परीन्दनानि।। अहं त्वमानन्द इमां गम्भीरां प्रज्ञापारमितामनुपरीन्दामि लोकेस्मिन् सदेवमानुषासुरस्य लोकस्यार्थाय यावद्यामि यस्या अपरित्यक्ता बुद्धा अपरित्यक्ता धर्मा अपरित्यक्ता
संघा अपरित्यक्ता अतीतानागतप्रत्युत्पन्नानां बुद्धानां भगवतामपरित्यक्तानुत्तरा सम्यक्संबोधिः स्य यं गम्भीरां प्रज्ञापारमितां अपरित्यक्ता भवतु। अयं मम शासनानुशासनी।। यः कश्चिदा
नन्द कुलपुत्रो वा कुलदुहिता वा इमां गम्भीरां प्रज्ञापारमितां उद्ग्रहीष्यति धारयिष्यति वाचयिष्यति पर्यवाप्स्यति प्रवर्तयिष्यति योनिशश्च मनसिकरिष्यति। परेभ्यश्च इमां गम्भीरां प्रज्ञा
पारमितामनेकपर्यायेण विस्तरेणाख्यास्यति देशयिष्यति प्रज्ञपयिष्यति प्रस्थापयिष्यति विवरिष्यति विभजिष्यति उत्तानीकरिष्यति संप्रकाशयिष्यति। स खलु पुनरानन्द कुलपुत्रो वा

वाचयितव्या ॥ ३ स्वर्नायिक्रुगत्तमत्त ॥ कल्याणमित्रपरिगृहीता ॥ किं चाप्यानन्द येन कृतपूर्व्वा वा कृतहस्तिका वा कथगगत्योर्द्दन ॥ सम्यक्संबुद्धस्यान्तिके कुशलमूलमवरोपितं सनतद्विसंवादयि:
ष्यति ॥ श्रावकत्वाय वा प्रत्येकबुद्धत्वाय वा अपि नु खलु पुनरानन्द सत्त्वनिसं विदितमन बोधिसत्त्वेन महासत्त्वेन स्तविनयं । दानपारमितायां चरता शीलपारमितायां चरता क्षान्तिपारमितायां चरता
वीर्य्यपारमितायां चरता ध्यानपारमितायां चरता प्रज्ञापारमितायां चरता सर्व्वगन्यनास्तस्य फतिं गहाधिपस्यष्टब्य मम्म स्थार्य्यसत्ये स्वप्रमाराध्यानारूप्यसमापत्तिषु सर्व्वविभाक्रुसमाधिसमापत्तिष्व नगीम
खस्थरि हास्तदगवस्तवेभानद्यगिसम्बित्स्वावधिकवुद्धधर्म्मेषु चरता सर्व्वाकारज्ञतायां चरता सत्त्वनिसंविदितास्त्रानन्द बोधिसत्त्वा महासत्त्वो दानपारमितायां चरतं शीलपारमितायां चरतं क्षान्ति
पारमितायां चरतं वीर्य्यपारमितायां चरतं ध्यानपारमितायां चरतं प्रज्ञापारमितायां चरतं श्रावकत्वाय वा न प्रत्येकबुद्धत्वाय वा स्थापयिति तस्मात्तर्ह्यानन्दानुपरीन्दामि तत्र मां गरीकारं प्रज्ञापार
मितां सत्त्वत्तुनस्त्र मानन्दयमया धर्म्मादेशिता संक्षेपित्वा प्रज्ञापारमितां सर्व्वाकारं धर्म्मादेशनाम् अक्षरूपपर्य्यवाप्य पुनरवनागय धूनरवास्तुऊर्ने मत्त मानन्दगायकाभयवाद्धः स्याः सत्त्व:
मानन्दे मां गरीकारं प्रज्ञापारमितामक्षरूपपर्य्यवाप्यन्तकृपदमपिनागययत्रक्षरवता मत्त्वमानन्दापवाद्धः स्याः सत्त्वमानन्दमां गरीकारं प्रज्ञापारमितामक्षरूपपर्य्यवाप्यिद्धपद: ३९३
मपिपूनरवनागय धूनरवास्तुऊक्षरवता मत्त्वमानन्दापवाद्धः स्याः ॥ तस्मात्तर्ह्यानन्दानुपरीन्दामि तत्र थमां गरीकारं प्रज्ञापारमितां परमया मक्षरीकया धारयितव्या वाचयितव्या पर्य्यवाप
व्याप्रवर्त्तयितव्या यानिशम्य मनसिकर्त्तव्या रवगत्तयावस्तव्य कन्नस्य परिगृहीत नाक्रयपदवाऊननस्तु निरूक्षव यपरिगृहीता चकल्याया । यः कश्चिदानन्द कृतपूर्व्वा वा कृतहस्तिका वा शमां:
गरीकारं प्रज्ञापारमितामक्षरीष्यन्ति धारयिष्यन्ति वाचयिष्यन्ति पर्य्यवाप्स्यन्ति प्रवर्त्तयिष्यन्ति । यानिशम्य मनसिकरिष्यन्ति तेन कृतपूर्व्वा वा कृतहस्तिका वा इतिकानागतवुद्धसत्त्वन्नानांवः

प्रज्ञापारमितापरीन्दना द्वितीयं कारणं ॥ ~ ॥ सचेत्त्वमानन्द श्रावकयानिकानां पुद्गलानां श्रावकभूमिमारभ्य धर्म्मन्देशयेस्तया च धर्म्मदेशनया ये त्रिसाहस्रमहासाहस्रे लोकधातौ सत्वास्ते स
र्व्वेऽर्हत्वं साक्षात्कुर्युः नैवं त्वया मम श्रावकेण श्रावककृत्यं कृतं स्यात् सचेत्पुनस्त्वमानन्द बोधिसत्वस्य महासत्वस्यैकमपि प्रज्ञापारमिताप्रतिसंयुक्तं पदं देशयेः प्रकाशयेः एवमहं त्वया श्रा
वकेनाराधितः स्यां एवं श्रावकेण श्रावककृत्यं कृतं स्यात् या च पुनस्त्वयैकया धर्म्मदेशनया त्रिसाहस्रमहासाहस्रे लोकधातौ सत्वाः सर्व्वे एवं चानेन मानुष्यकमात्मभावं प्रतिलभ्यार्हत्वं
साक्षात्कुर्युः स एकैकार्हन्दानमयं पुण्यक्रियावस्तु शीलमयं पुण्यक्रियावस्तु भावनामयं पुण्यक्रियावस्तु तत्किं मन्यसे त्वमानन्दापि नु तत्पुण्यक्रियावस्तु बहु ॥ आनन्द आह ॥ बहु भगव
न्बहु सुगत ॥ भगवानाह ॥ अतः स आनन्द बहुतरं पुण्यं प्रसवति यः श्रावकयानिकः पुद्गलो बोधिसत्वस्य महासत्वस्य प्रज्ञापारमिताप्रतिसंयुक्तं धर्म्मन्देशयेदन्तश एकदिवसमपि तिष्ठत्वानन्द
एकदिवसं स च यावदर्द्धदिवसमपि तिष्ठत्वर्द्धदिवसं यावन्मुहूर्त्तमपि तिष्ठत्वानन्द मुहूर्त्तकं स च यावन्नालिकामन्तशः स च यावल्लवं वा यावत्तु क्षणमपि तिष्ठत्वानन्द त्वमन्यमानिमेषमात्रमः
पि आसयमानन्द ततो बहुतरं पुण्यं प्रसवति यः श्रावकयानिकः पुद्गलो बोधिसत्वस्य महासत्वस्य प्रज्ञापारमिताप्रतिसंयुक्तं धर्म्मन्देशयेत् न तु सर्व्वश्रावकयानिकानां सर्व्वप्रत्येकबुद्धयानिकानां पु
द्गलानां कुशलमूलसमतिक्रान्तं किं सचेदानन्द बोधिसत्वो महासत्वो बोधिसत्वयानिकानां पुद्गलानां प्रज्ञापारमिताप्रतिसंयुक्तं धर्म्मन्देशयेदन्तश एकदिवसमपि अर्द्धदिवसमपि पूर्वाह्णकमपि नाति
क्रान्तमप्या क्षणमपि लवमप्या निमेषमात्रमपि सचेदानन्द बोधिसत्वो महासत्वस्सर्व्वश्रावकप्रत्येकबुद्धयानिकानां कुशलमूलान्यभिभूय कुशलमूलसमतिक्रान्तो भवति तत्कस्य हेतोः तथा हि सत्वा
सनायानत्वं तां सम्यक्संबोधिमभिसंबोद्धुकामा ये तम्यक्संबोधये संप्रदर्शयति समुत्तेजयति समादापयति निवेशयति प्रतिष्ठापयति ॥ नैवमानन्द बोधिसत्वो महासत्वो यत्

कल्प इदिमावा ज्ञियमनुत्तरां सम्यक्संबोधिमभिसंबोत्स्यन्ते। सत्या सत्वस्य भविष्यन्ति सर्व्वाकारज्ञतायाः। तत्कस्य हेतोः ४ प्रज्ञापारमितानिर्ज्जाता ह्यानन्द बुद्धानां भगवतामनुत्तरा सम्यक्संबोधिः ४ येपि ते आनन्दातीतेध्वनि तथागता अर्हन्तः सम्यक्संबुद्धा अभूवंस्तेषामप्यानन्द बुद्धानां भगवतां प्रज्ञापारमितानिर्ज्जातैवानुत्तरा सम्यक्संबोधिः ४ येपि ते भविष्यन्त्यनागतेध्वनि तथागता अर्हन्तः सम्यक्संबुद्धा अभूवंस्तेषामप्यानन्द बुद्धानां भगवतां प्रज्ञापारमितानिर्ज्जातैवानुत्तरा सम्यक्संबोधिः ४ येपि ते आनन्देतर्हि पूर्वस्यां दिशि दक्षिणस्यां पश्चिमायामुत्तरस्यामधऊर्द्ध्वं विदिक्षु दशदिग्लोकधातुषु तथागता अर्हन्तः सम्यक्संबुद्धास्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मं देशयन्ति। तेषामप्यानन्द बुद्धानां भगवतां प्रज्ञापारमितानिर्ज्जातैवानुत्तरा सम्यक्संबोधिः ४ तस्मात्तर्ह्यानन्द बोधिसत्वेन महासत्वेनानुत्तरां सम्यक्संबोधिमभिसंबोद्धुकामेन इह प्रज्ञापारमितायां शिक्षितव्यं। तत्कस्य हेतोः ४ एषा ह्यानन्द बोधिसत्वानां महासत्वानां माता जनयित्री यदुत प्रज्ञापारमिता। ये केचिदानन्द बोधिसत्वा महासत्वाः प्रज्ञापारमितायां शिक्षिष्यन्ते सर्व्वे ते निर्य्यास्यन्त्यनुत्तरायां सम्यक्संबोधौ॥ तस्मात्तर्ह्यानन्द मां प्रज्ञापारमितां भूयस्या मात्रया परीन्दामि। तत्कस्य हेतोः ४ यथा ह्यानन्द तथागतानामर्हतां सम्यक्संबुद्धानां धर्म्मकायस्य ष्येयदुत प्रज्ञापारमिताकाश ४ येपि ते आनन्द पूर्वस्यां दिशि दक्षिणस्यां पश्चिमायामुत्तरस्यामधऊर्द्ध्वं विदिक्षु दशदिग्लोकधातुषु तथागता अर्हन्तः सम्यक्संबुद्धास्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मं देशयन्ति। तेषामप्यानन्द बुद्धा भगवन्तः प्रज्ञापारमिताकाशाद्देशयन्ति॥ येपि ते आनन्दातीतेध्वनि तथागता अर्हन्तः सम्यक्संबुद्धा अभूवंस्तेपि प्रज्ञापारमितायां शिक्षित्वानुत्तरां सम्यक्संबोधिमभिसंबुद्धा धर्म्मं देशितवन्तः। येपि ते आनन्द भविष्यन्त्यनागतेध्वनि तथागता अर्हन्तः सम्यक्संबुद्धा भविष्यन्ति तेपि प्रज्ञापारमितायां शिक्षित्वानुत्तरां सम्यक्संबोधिमभिसंबोध्य धर्म्मं देशयिष्यन्ति। येपि ते आनन्दातीतानागतप्रत्युत्पन्नानां बुद्धानां भगवतां श्रावकाः सर्व्वे ते इह प्रज्ञापारमितायां शिक्षित्वा परिनिर्वृताः परिनिर्वान्ति परिनिर्वास्यन्ति च॥ इति महायाविज्ञता॥

नि।

करयुक्तासत्त्वयुद्धं गतं वस्तु थानानात्वसमारूढं। इति। एवं ह्यानन्द सर्व्वधर्म्मा स्वकृथानानात्वसमारूढं। इति। न धर्म्मा धर्म्मस्यात्मसमारूढं। इति। न धर्म्मा धर्म्मं पश्यन्ति। न धर्म्मा धर्म्मं जानन्ति। सर्व्वधर्म्मा ह्यानन्दा-
ऽजानकाऽपश्यकाऽक्रियासमर्थ्याः। आगत्कस्य हेतोः। निरीहकाऽग्राह्या ह्यानन्द सर्व्वधर्म्माऽग्राह्या निरीहकतयाऽचिन्त्याः सर्व्वधर्म्मा मायापुरुषोपमाऽवेदका ह्यानन्द सर्व्वधर्म्माऽसार-
कतया॥ एवं चरन्नानन्द बोधिसत्त्वो महासत्त्वश्चरति प्रज्ञापारमितायां न क्वचिद्धर्म्मे अभिनिविशते। एवं शिक्षमाण आनन्द बोधिसत्त्वो महासत्त्वश्चरति प्रज्ञापारमितायां न क्वचि-
द्धर्म्मेऽभिनिविशते। एवं शिक्षमाण आनन्द बोधिसत्त्वो महासत्त्वः शिक्षते प्रज्ञापारमितायां। सर्व्वपारमितापूरणप्राप्तुकामेन बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं॥ इयं हि शि-
क्षायाः अग्रमाख्यायते श्रेष्ठमाख्यायते ज्येष्ठमाख्यायते वरमाख्यायते प्रवरमाख्यायते प्रणीतमाख्यायते उत्तममाख्यायते निरुत्तममाख्यायते। सर्व्वलोकहिता सर्व्वलोकसुखाजना अनाथानाथकरी बुद्धाः
नुज्ञाता बुद्धप्रशस्ता॥ यत्र शिक्षित्वा तथागता अर्हन्तः सम्यक्संबुद्धा इमं त्रिसाहस्रमहासाहस्रं लोकधातुं दक्षिणेन पाणिनोत्क्षिप्य पुनरपि निक्षिपेयुः पुनर्न च तथा भवत्कस्यचिदुत्क्षिप्तो वायं त्रिसाहस्र-
महासाहस्रो लोकधातुर्निक्षिप्तो वेति॥ तत्कस्य हेतोः॥ इयं ह्यानन्द प्रज्ञापारमिता शिक्षा यत्र शिक्षित्वा बुद्धानां भगवतामतीतानागतप्रत्युत्पन्नेषु धर्म्मेष्वसङ्गज्ञानदर्शनमुत्पन्नं। यावत्य आनन्द शिक्षाः
सर्व्वासामानन्द शिक्षाणामियं प्रज्ञापारमिताशिक्षाऽग्रमाख्यायते श्रेष्ठमाख्यायते ज्येष्ठमाख्यायते वरमाख्यायते प्रवरमाख्यायते प्रणीतमाख्यायते उत्तममाख्यायते निरुत्तममाख्यायते। आकाशस्य ह्यानन्द प्रमाणस्याप-
र्यन्तस्याऽक्षयीकत्वं मन्यते यः प्रज्ञापारमितायाः प्रमाणस्य पर्यन्तमस्याम्र्दांकत्वं मन्यते॥ तत्कस्य हेतोः॥ अप्रमाणा ह्यानन्द प्रज्ञापारमिता अनन्ता ह्यानन्द प्रज्ञापारमिता॥ प्रमाणमात्राः प्रमाणमाख्यातं नामका-
यपदकायव्यञ्जनकायाः ह्यानन्द प्रमाणबद्धा न प्रज्ञापारमिता प्रमाणबद्धा॥ ७ ॥ इति श्रीमहाबोधिप्राप्तये पूर्व्यवादःस्त्वाकसंरक्षणीयं काव्यशमित्रकृतानि कायव्यानि॥ ८ ॥ एवमकृत्वायुः

का२

पारमितासु चरन्न चतुर्षु स्मृत्युपस्थानेषु चरन्न सम्यक्प्रहाणर्द्धिपादेन्द्रियबलबोध्यंगमार्गेषु चरन्नाध्यात्मशून्यतायां चरन्न बहिर्द्धाशून्यतायां चरन्न्यावदभावस्वभावशून्यतायां चरन्नप्रमाणध्याना
रूप्यसमापत्तिषु चरन्नार्यसत्येषु चरन्न सर्वविमोक्षसमाधिसमापत्तिष्वभिज्ञासु चरन्न शून्यतानिमित्ताप्रणिहितेषु चरन्न तथागतबलवैशारद्यप्रतिसंविदावेणिकबुद्धधर्मेषु चरन्न
र्वाकारज्ञतायां चरन्न कुशलमूलैर्विवर्द्धमानो ऽस्थानमनवकाशो यदनुत्तरायाः सम्यक्संबोधेर्वात्येः । यदि तावत्सत्त्वान्न दक्षिणेविचयन सत्त्वारक्षन्यन न प्रज्ञापारमितायामभ्यासयोगं चरन्न ज्ञेयविषयदोषे चरन्न
मायकर्मणे चर्यासत्त्वगमेवउकिन्न समुदागमस्य सन्नियामिकता । तन्नियतं सत्त्वसत्तावन्तु ॥ ⌐ ॥ अथ खलु भगवानायुष्मन्तं शारिपुत्रमामन्त्रयते स्म । पश्यसि शारिपुत्र तथागतं । शारिपुत्र आह । पश्यामि भगवन्यथा शारिपु
त्र आह पश्यामि भगवन्तं तथागतमर्हन्तं सम्यक्संबुद्धं पश्यन्ति स्म । भिक्षुसंघपरिवृतं बोधिसत्त्वगणपरिवृतं धर्मं देशयन्तं सागरनागराजपर्यायं ऽष्टादिगम्यान्यायामतैव नर्दीक्षि । श्रीसमुद्रवेनिर्जनोवर्मोदवेशतः
विमुक्तिविशुद्धिं विमुक्तिपुत्र ज्ञानदर्शनेन महासत्त्वानाम् । कलकरुणो । कलकर्णशीर्षपद्मनरावचरन्न पापकस्य कायेः । यदि शीलस्कन्धं समाधिस्कन्धं सम्यक्सहायमविमुक्तिविशेषसर्वविद्वांसो भगवान्यदा प्रज्ञापारमिताः
प्रापके बोधिसत्त्वयानिकैः श्रुता ॥ अथ खलु भगवान्पुनरेवायुष्मन्तं शारिपुत्रमामन्त्रयते स्म ॥ यत्र शारिपुत्र संस्कृतं कायेन कारणं ऽस्मिन्धरितानि पश्यन्ति स्म ॥ केन कारणेन तथागतमर्हन्तं ३९४
सम्यक्संबुद्धं श्रावकयानिका वा प्रत्येकबुद्धयानिका वा बोधिसत्त्वयानिका वा पृथग्जनाः सर्वबुद्धस्य तमकारयेत तथागतस्यार्हतः सम्यक्संबुद्धस्य न रूपं पश्यन्ति स्म ॥ सर्वबुद्धप्रभावाधिष्ठानसंधानतया बुद्धि
न्द्रियस्यावतारासमागच्छति ॥ तत्कस्य हेतोः नाधिष्ठानसंदर्शनादिति भगवान्तथागतस्य समाशारिपुत्रसमन्तरूपं न पश्यन्ति स्म ॥ अथ खलु भगवानायुष्मन्तमानन्दमामन्त्रयते स्म ॥ एवं ह्यानन्द सर्वधर्माः
चक्षुषोऽनाभासमागच्छन्ति न धर्मा धर्मस्याभासमागच्छन्ति न धर्मा धर्मं पश्यन्ति न धर्मा धर्मं जानन्ति । यथा पुनरयं सारिपुत्र भगवता तथागतेन सम्यक्संबुद्धस्य श्रावकाः प्रत्येकबुद्धयानिका बोधिसत्त्वयानिकाः

रूसक

यवलनेकत्रयपरिणामयति।किम्वायपरिणामयति।कुत्रवापरिणामयति।एवंखलुसुभूतेबोधिसत्त्वोमहासत्त्वःषट्सुपारमितासुशिक्षित्वाशीलपारमितांपरिपूरयति।सुभूतिराह।कथंभगवन्बोधिसत्त्वो
महासत्त्वःषट्सुपारमितासुशिक्षित्वावीर्यपारमितांपरिपूरयति॥भगवानाह॥इहसुभूतेबोधिसत्त्वोमहासत्त्वःषट्सुपारमितासुशिक्षित्वावीर्यंसंजनयति।नादंयोजनंवागत्वायोजनशतंवागत्वायो
जनसहस्रंवायोजनशतसहस्रंवायोजनकोटीनियुतशतसहस्रंवालोकधातुंवालोकधातुसहस्रंवालोकधातुशतसहस्रंवालोकधातुनियुतशतसहस्रंवालोकधातुकोटींवालोकधातुकोटीशतंवा
लोकधातुकोटीसहस्रंवालोकधातुकोटीशतसहस्रंवालोकधातुकोटीनियुतशतसहस्रंवागत्वागत्वानेकसत्त्वमपिगवरगगमनभिकायदषूनखुति।स्थापयेयं।श्रोतआपत्तिफलेवासकृदागामिफलेवा
अनागामिफलेवाअर्हत्त्वेवाप्रतिष्ठापयेयंप्रत्येकबोधौवाप्रतिष्ठापयेयं।अनुत्तरायांवासम्यक्संबोधौप्रतिष्ठापयेयं।तानिचकुशलमूलानिसर्वसत्त्वसाधारणानिकृत्वानुत्तरायांसम्यक्संबोधौपरिणामयति।कथ
पंपरिणामयति।यथासर्वत्रिविभवद्विर्नखवलति।कावापरिणामयति।किम्वापरिणामयति।कुत्रवापरिणामयति॥एवंखलुसुभूतेबोधिसत्त्वोमहासत्त्वःषट्सुपारमितासुशिक्षित्वावीर्यपारमितांपरिपूरयति।सुभूतिराह॥
कथंभगवन्बोधिसत्त्वोमहासत्त्वःषट्सुपारमितासुशिक्षित्वाध्यानपारमितांपरिपूरयति॥भगवानाह॥इहसुभूतेबोधिसत्त्वोमहासत्त्वःषट्सुपारमितासुशिक्षित्वाप्रथमंध्यानमुपसंपद्यविहरति।द्वितीयंध्यानमुपसंपद्य
विहरति।तृतीयंध्यानमुपसंपद्यविहरति।चतुर्थंध्यानमुपसंपद्यविहरति॥उत्पन्नानांचाम्विलयकर्मिकान्धर्मान्कुशलमूलायसदिशान्सर्वसत्त्वसाधारणानिकृत्वासर्वाकारज्ञतायांपरिणामयति।कथंपरिणामय
ति।यथाध्यानानिचध्यानाङ्गानिचतस्मिन्नसमयेनायत्तरोग।एवंखलुसुभूतेबोधिसत्त्वोमहासत्त्वःषट्सुपारमितासुशिक्षित्वाध्यानपारमितांपरिपूरयति।सुभूतिराह।कथंभगवन्बोधिसत्त्वोमहासत्त्वःषट्सुपारमितासु
शिक्षित्वाप्रज्ञापारमितांपरिपूरयति॥भगवानाह॥इहसुभूतेबोधिसत्त्वोमहासत्त्वःषट्सुपारमितासुशिक्षित्वानकस्मिन्नसमयधर्मेधर्ममनुपश्यीविहरति।निर्विकल्पविदायसर्वाभावकायेनवाऽक्यकायेनवानवमीधर्मतांसाक्ष

६२

ष्मानानन्दो भगवन्तमेतदवोचत्। केन कारणेन भगवन्प्रज्ञापारमिताऽमासवज्ञा॥ भगवानाह॥ सूत्रेयत्वादानन्द प्रज्ञापारमिताऽप्रमाणवज्ञा विविक्तादानन्द प्रज्ञापारमिताप्रमाणव
ज्ञा यपि त आनन्दास्त्वं वच्चनीयाऽनितथागता अर्हन्तः सम्यक्संबुद्धाः तेपि बुद्धा भगवन्तः नैव प्रज्ञापारमिता नष्टपुराविज्ञानं च प्रज्ञापारमिता नोपलभ्यन्ते यपि त आनन्द रुविष्यन्ता
नागतध्वनि तथागता अर्हन्तः सम्यक्संबुद्धाः तेपि बुद्धा भगवन्तः नैव प्रज्ञापारमिता नष्टपुराविज्ञानं च प्रज्ञापारमिता नोपलभ्यन्ते। यपि त आनन्द एतर्हि दशदिशि लोकधा
तौ अर्हन्तः सम्यक्संबुद्धाः तिष्ठन्ति ध्रियन्ते यापयन्ति धर्मं देशयन्ति तेपि बुद्धा भगवन्तः नैव प्रज्ञापारमिता नष्टपुराविज्ञानं च प्रज्ञापारमिता नोपलभ्यन्ते॥ तत्कस्य हेतोः आकाः
